1

न च ज्योतिष्टोमेन स्वर्गकामो यजेतेति विधिप्राप्तयागोद्देशेन सोमरूपगुणविधा
नमेवास्तु सोमेन यागं भावयेदिति किं मत्वर्थलक्षणयेति वाच्यं ॥ तस्याधिकरणावि
धित्वेनोत्पत्तिविधित्वासंभवात् ॥ नन्तूद्भिदा यजेत पशुकाम इत्यस्येव ज्योतिष्टो
मेनेत्यस्याप्युत्पत्त्यधिकारविधित्वमस्त्विति चेन्न ॥ दृष्टान्ते उत्पत्तिवाक्यान्तराभावे
नान्यथानुपपत्त्या तथात्वाश्रयणात् ॥ किन्तु ज्योतिष्टोमेनेत्यस्योत्पत्तिविधित्वेनैव या
गस्तस्य फलसंबंधोपि बोधनीय इति तु द्द[illegible]ौ वाक्यभेदः ॥ तद्वरं सोमपदे च मत्व
र्थलक्षणया विशिष्टविधानं ॥ विधिश्चतुर्विधः ॥ उत्पत्तिविधिः विनियोगविधिः
रधिकारविधिः प्रयोगविधिश्चेति ॥ तत्र कर्मस्वरूपमात्रबोधको विधिरुत्पत्ति
विधिः ॥ यथा अग्निहोत्रं जुहोतीति ॥ अत्र च विधौ कर्मणः करणत्वेनान्वयः ॥ अ
ग्निहोत्रेणेष्टं भावयेदिति ननु यागस्य द्वे रूपे ॥ द्रव्यं देवता च ॥ तथा च रूपाश्रवणे

अहो

अग्निहोत्रं जुहोतीति कव्यमुत्पत्तिवि[illegible]धिः॥ [illegible] अग्निहोत्रे [illegible] शब्दस्य नु
४ तत्प्रख्यन्यायेन नामधेयत्वादिति चेन्न॥ [illegible] रूपाश्रवणेप्यस्योत्पत्तिविधि
त्वात्॥ अन्यथा रूपाश्रवणाद्दध्ना जुहोतीति अयमेवोत्पत्तिविधिः स्यात्॥ त
था चाग्निहोत्रं जुहोतीति वाक्यमनर्थं स्यात्॥ अंगप्रधानसंबंधबोधको विधि
५ग) नि) विनियोगविधिः॥ यथा दध्ना जुहोतीति॥ न हि तृतीयया प्रतिपन्नांगभावदध्नो हो
मसंबंधं विधत्ते॥ दध्ना होमं भावयेदिति॥ गुणविधौ धात्वर्थस्य साध्यत्वेनान्वयः दि
क्वचिदाश्रयत्वेना [illegible] पि॥ यथा दध्नेंद्रियकामस्य जुहुयादित्यत्र दधिक
३क ३न रणत्वेन इंद्रियं भावयेत्॥ तत्र किंनिष्ठमित्याकांक्षायां सन्निधिप्राप्तहोमआ
श्रयत्वेनान्वेति॥ एतस्य विधेः सहकारिभूतानि षट्प्रमाणानि॥ श्रुतिलिंग[illegible]
वाक्यप्रकरणस्थानसमाख्यारूपाणि॥ एतत्सहकृतेनानेन विधिनांगत्वपरोद्देश्य

प्रकृतिसाध्यत्वरूपं परार्थ्यापरपर्यायं ज्ञाप्यते॥ तत्र निरपेक्षो रवः श्रुतिः॥
सा च त्रिधा॥ विधात्री [illegible] अभिधात्री विनियोक्त्री॥ लिङात्मिका॥ द्वितीयाद्या
श्रुतिः॥ यस्य च शब्दस्य श्रवणादेव संबंधः प्रतीयते सा विनियोक्त्री॥ सा च त्रि
विधा विभक्तिरूपा एकाभिधानरूपा॥ एकपदरूपा चेति॥ तत्र विभक्तिश्रुत्या
अंगत्वं॥ यथा व्रीहिभिर्यजेतेति तृतीयाश्रुत्या व्रीहीणां यागांगत्वं॥ आरुण्याएक ग
२ हायन्या गवा सोमं क्रीणातीत्यस्मिन्वाक्ये आरुंण्यापि तृतीयाश्रुत्या क्रि ण्य
पि यांगत्वं तद्गोरूपद्रव्यपरिच्छेदद्वारा॥ न तु साक्षात्॥ अमूर्तत्वात्॥ व्रीही
न्प्रोक्षतीति प्रोक्षणस्य व्रीह्यंगत्वं द्वितीयाश्रुत्या॥ तच्च प्रोक्षणं न व्रीहि
स्वरूपार्थं॥ तस्य तेन विनाप्युपपत्तेः॥ किंत्वपूर्वसाधनत्वप्रयुक्तं व्रीही

५

नप्रोक्ष्ययागानुष्ठानेऽपूर्वानुत्पत्तेः॥ एवंसर्वेष्वंगेष्वपूर्वप्रयुक्तमंगत्वं
बोध्यं॥ एवमिमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते इत्यत्र
द्वितीययाश्रुत्यामंत्रस्याश्वाभिधान्यंगत्वं॥ यदाहवनीयेजुहोतीत्याहवनी
यस्यहोमांगत्वंसप्तमीश्रुत्या॥ एवमन्योपिविविभक्तिश्रुत्याविनियोगोज्ञेयः॥
पशुनायजेतेत्यत्रएकत्वपुंस्त्वयोः समानाभिधानश्रुत्याकारकांगत्वं॥ य
जेतेत्याख्याताभिहितसंख्यायाभावनांगत्वंसमानाभिधानश्रुतेरेवपदश्रु
त्याचयागांगत्वं॥ नचामूर्तायास्तस्याः कथंभावनांगत्वंवाच्यं॥ कर्तृपरिच्छेद
द्वारात्तदुपपत्तेः॥ कर्त्ताचाक्षेपलभ्यः आख्यातेनहिभावनोच्यते॥ साचकर्ता
रंविनाऽनुपपन्नेतिसेयंश्रुतिः लिंगादिभ्यः प्रबलालिंगादिषुनप्रत्यक्षो

३

गिक

विनियोजकः शब्दोस्ति किंतु कल्प्यं यावच्छ्रुतेर्विनियोजकः कल्प्यते तावत्स्व
यं क्लृप्तया श्रुत्या विनियोगस्य कृतत्वेन तेषां कल्पकत्वशक्तेर्विहतत्वात्॥ अत
एवैंद्र्याः लिंगान्नेंद्रोपस्थापनसमर्थत्वं॥ किंतु ऐंद्र्या गार्हपत्यमुपतिष्ठते इत्यत्र गा
र्हपत्यमिति द्वितीयाश्रुत्या गार्हपत्योपस्थापना [illegible] शब्दसामर्थ्यं लिंगं॥ यदाहुः॥
सामर्थ्यं सर्वशब्दानां लिंगमित्यभिधीयते॥ सामर्थ्यं रूढिरेव॥ तेन समाख्यातो नाभेदः
यौगादिशब्दसमाख्यातो रूढ्यात्मकलिंगशब्दस्य भिन्नत्वात्॥ तेन बर्हिर्देवसदनं दा
मीति मंत्रस्य कुशलवनांगत्वं॥ न तु उलपादिलवनांगत्वं तस्य बर्हिर्दामीति लिंगान्नवल्ल
वनं प्रकाशयितुं समर्थत्वात्॥ एवमन्यत्रापि लिंगाद्विनियोगो द्रष्टव्यः॥ नदिदलिंगवाक्या
दिभ्यो बलवत्॥ अत एव स्योनं ते सदनं कृणोमीति मंत्रस्य पुरोडाशसदनकरणांगत्वं सद

६ स

अ

नं कृणोमीति लिंगात्॥ नतु वाक्यात्॥ समभिव्याहारो वाक्यं॥ समभिव्याहारश्च साध्यत्वादिवा
चकद्वितीयाद्यभावेपि वस्तुतः शेषशेषिवाचकपदयोः सहोच्चारणं॥ यस्य पर्णमयी
जुहूर्भवति न स पापं श्लोकं शृणोति॥ अत्र पर्णताजुह्वोः समभिव्याहारादेव पर्णता
याः जुह्वंगत्वं॥ न चानर्थक्यं अन्यथापि जुह्वः सिद्धत्वादिति वाच्यं॥ जुहूशब्देन तत्साध्या
पूर्वलक्षणात्॥ तथा च वाक्यार्थः॥ पर्णतया अवत्तहविर्धारणद्वारा जुह्वा पूर्वं भावये
दिति वत्तहविर्धारणद्वारेति चावश्यं [illegible] वक्तव्यं॥ अन्यथा स्रुवादिष्वपि पर्णता
पत्तेः॥ सेयं पर्णता अनारभ्याधीतापि सर्वप्रकृतिष्वेवान्वेति॥ न विकृतिषु तत्रोचोद
केनापि तत्प्राप्तिसंभवात्॥ पौन[illegible]रुक्त्या [illegible] पत्तेः॥ यत्र सामग्र्या
ग्र्यागोपदेशः सा प्रकृतिः॥ यथा दर्शपूर्णमासादिः तत्र करणे सर्वांगपाठात्॥ यत्र न स

५

मग्रं गोपदेशः॥ सा विकृतिः॥ यथा सौर्यादिः। तत्र कृतिपयांगानामतिदेशेन प्रा
प्तत्वात्॥ अनारभ्यविधिः सामान्यविधिः॥ तदिदं वाक्यं प्रकरणादिभ्यो बलवत्
अत एवं द्वाग्नीइदं ह विरित्यादेरेकवाक्यत्वाद् दर्शांगत्वेन तु प्रकरणात् दर्शपूर्ण
मासांगत्वं॥ उभयाकांक्षा प्रकरणं यथा प्रयाजादिषु समिधो यजतीत्यादौ फ वाक्ये
लविशेषस्यानिर्देशात्॥ सन्निधानेन भावयेदिति बोधानन्तरं किमित्युपका
र्यकांक्षा दर्शपूर्णमासवाक्येपि दर्शपूर्णमासाभ्यां स्वर्गं भावयेदिति बोधा
नन्तरं कथमित्युपकारकाकांक्षा॥ इत्थं लोभयथा॥ प्रयाजादीनां दर्शपू
र्णमासांगत्वं॥ तच्च प्रकरणं द्विविधं॥ महाप्रकरणमवान्तरप्रकरणं चेति॥

मुख्यभावनासंबंधिप्रकरणंमहाप्रकरणं॥तेनचप्रयाजादीनांदर्शपूर्ण
मासांगत्वं॥एतच्चप्रकृतावेवउत्पन्नयाकांक्षायाःसंभवात्॥ननुविकृतौत्त

त्रप्रकृतिवद्विकृतिःकर्तव्येत्यतिदेशेनकथंभावाकांक्षायाउपशमेनापू
र्वांगानामपिउत्पन्नयाकांक्षयाविनियोगासंभवात्॥तस्मादपूर्वांगानांस्था
नादेवविकृत्यर्थमिति॥अंगभावनासंबंधिप्रकरणमवांतरप्रकरणं॥तेनच
अभिक्रमणादीनांप्रयाजाद्यंगत्वं॥तच्चसंदंशेनैवज्ञायते॥तदभावेवावि
शेषात्॥सर्वेषांफलभावनाकथंभावेनग्रहणप्रसंगेनप्रधानांगत्वापत्तेः॥ए
कांगानुवादेनविधीयमानयोरप्यंगयोरंतरालेविहितत्वंसंदंशः॥यथाअभि

क्रमणे॥ तत्र हि समानयन्त [illegible] उपक[illegible]तेस्ते जोवा इत्यादिना प्रयाजानुवादे
न किंचिदंगं विधीयते [illegible] दनंतरमपि प्रयाजानुवादे न प्रया
जत्वं यस्यैवं विदुषः प्रयाजा इज्यंते प्रैभ्यो लोकेभ्यो भ्रातृव्यानुदते ऽभिक्रा
मं जुहोत्यभिजित्यै॥ यो वै प्रजानामभिनुनदेत्यादि किंचिदंगं विधीयते॥

या

अतः प्रयाजांगमध्ये अभिहितमभिक्रमणं॥ तदंगं प्रयाजैरपूर्वं कृत्वा या
गोपकारं भावयेदिति ज्ञानेन कथमेभिरपूर्वं कर्तव्यमिति कथंभावाकांक्षा

5

याः सत्वात् सा च स्वरूपप्रतिपादितैरभिक्रमणादिभिः शाम्यति॥ न चांगभावना
याः कथंभावाकांक्षाभावः॥ भावनासामान्ये न तत्रापि तत्संभवात्॥ यदि दं
प्रकरणं क्रियायाया एव साक्षाद्विनियोजकं द्रव्यगुणयोस्तु तद्द्वारा तत्वा हि॥

८

यजेत स्वर्गकाम इत्यत्र फलभावनायां कथंभावाकांक्षायां सन्निधिपठि
ताश्रूयमाणफलकं क्रियाजातमुपकार्याकांक्षयेतिकर्त्तव्यतात्वेनान्वेति॥
क्रियाया एव लोके कथंभावाकांक्षायामन्वयदर्शनात्॥ नहि कुठारेण छिं
द्यादित्यत्र कथंभावाकांक्षायामुच्चार्यमाणोपि हस्तोन्वेति॥ किंतु हस्तेनोद्य
म्य निपात्येति उद्यमनिपातने एव हस्तः श्रुतद्वारेणान्वेतीति सार्वजनीन
मेतत्॥ इदं च स्थानादिभ्यो बलवत्॥ अत एवाक्षैर्दीव्यति राजन्यमिति वि
देवनादयो धर्मा अभिषेचनीयसन्निधौ पठिता अपि स्थानान्न तदंगं किं
तु प्रकरणाद्राजसूयांगमिति दिक्॥ सामान्यं स्थानं तद्द्विविधं॥ पाठसादेश्य
मनुष्ठानसादेश्यं चेति॥ स्थानं क्रमश्चेत्यनर्थांतरं॥ पाठसादेश्यमपि द्वि

य

विधं॥ यथासन्निधिपाठः संख्यापाठश्चेति। तत्रैन्द्राग्नमेकादशकपालं
निर्वपेत् वैश्वानरं द्वादशकपालं निर्वपेदित्येवं क्रमविहितेषु। इन्द्राग्नी रोचना दिव इ
त्यादीनां याज्यानुवाक्यमन्त्राणां यथासंख्यं प्रथमस्य प्रथमे द्वितीयस्य द्वितीयमित्येवं
रूपो विनियोगो यथासंख्यपाठात् प्रथमपठितमन्त्रस्य हि कैमर्थ्याकांक्षायां प्रथमन्तो
विहितं कर्मैव प्रथममुपदिष्टं तेसमानदेशत्वात्॥ एवं द्वितीयमन्त्रस्यापि वेकृतां [अ]गानां प्राकृ
तांगानुवादेन विहितानां सं[नि]पतितानां विकृत्यर्थं सन्निधिपाठात् यथा आमनहोमा
नां ते[षां] हि कैमर्थ्याकांक्षायां फलं विकृत्यपूर्वमेव साध्यत्वेन संबध्यते उपस्थितत्वात्॥
स्यतेत्र फलकत्वे विकृतिसन्निधिपाठानर्थक्यापत्तेः॥ पशुधर्माणामग्नीषोमीयार्थत्वम
नुष्ठानसादेश्यात् औपवसथ्ये ह्नि अग्नीषोमीयः पशुरनुष्ठीयते तस्मिन्[ने?]नेव दिने ते ध
र्माः पठ्यन्ते॥ अतस्तेषां कैमर्थ्याकांक्षायां अनुष्ठेयत्वेनोपस्थितपश्वपूर्वमेव साध्यत्वेन

6

९

संबध्यते।।तच्च ▪ स्थानात्समाख्यातः प्रबलं।।अतएवशुंधध्वमंत्रः सान्नायपात्रां ▪ पाठ
सादेश्यात् नतु पौ▪रोडाशिकमितिसमाख्यया पुरोडाशपात्रांगं।।समाख्या यौगिकः श
ब्दः।।साच द्विविधा वैदिकी लौकिकी च।।तत्र होतुश्चमसभक्षणांगत्वं।।होतृचमस इति वै
दिकसमाख्यया अध्वर्योस्तत्पदार्थांगत्वं।।लौकिक्या आध्वर्यव इति समाख्ययेति
संक्षेपः।।तदेवं निरूपितानि संक्षेपतः श्रुत्यादीनि षट्प्रमाणानि एतत्सहकृतेन
विनियोगविधिना समिदादिरूपस्य दर्शपूर्णमासाभ्यां यजेतेत्येवंरूपेण यानि
नियोज्यंते तान्यंगानि द्विविधानि सिद्धरूपाणि क्रियारूपाणि चेति।।तत्र सिद्धा
नि जातिद्रव्यसंख्यादीनि तानि च दृष्टार्थान्येव।।क्रियारूपाणि च द्विविधानि।।गुणक
र्माणि प्रधानकर्माणि च।।एतान्येव सन्निपत्योपकारकाणि।।आराडुपकारकाणीति
चोच्यंते।।कर्मांगद्रव्याद्युद्देशेन विधीयमानं कर्म सन्निपत्योपकारकं।।यथा अवघात

प्रोक्षणादि॥ तच्च दृष्टार्थं अदृष्टार्थं॥ दृष्टादृष्टार्थं चेति॥ दृष्टार्थमवघातादि॥
अदृष्टार्थं प्रोक्षणादि॥ दृष्टादृष्टार्थं पशुपुरोडाशादि॥ तत्र हि द्रव्यत्यागांशेनैव
अदृष्टं देवतोद्देशेन च देवतास्मरणं दृष्टं करोति॥ द्रव्याद्यनुद्दिश्य केवलं विधी
यमानं कर्म आरादुपकारकं॥ यथा प्रयाजादि॥ आरादुपकारकं च परमापूर्वोत्पत्तावे
वोपयुज्यते॥ सन्निपत्योपकारकं तु द्रव्यदेवतासंस्कारद्वारा यागस्वरूपे
ण्युपयुज्यते॥ इदमेव चाश्रयिकर्मेत्युच्यते॥ तदेवं निरूपितः संक्षेपतो विनियो
गविधिः॥ प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः॥ स चांगवाक्यैकवाक्य
तापन्नप्रधानविधिरेव॥ स हि सांगं प्रधानमनुष्ठापयन् विलंबे प्रमाणाभावाद्वि न्न
लंबापरपर्यायं प्रयोगप्राशुभावं विधत्ते॥ न च तद्विलंबेपि प्रमाणाभाव इति॥

7

वाच्यं॥ विलंबेत्वंगप्रधानविध्येकवाक्यतावगततत्साहित्यानुपपत्तिः॥ विलं

१० बेन क्रियमाणयोः पदार्थयोः इदमनेन सह कृतमिति साहित्यव्यवहाराभावात्॥

स चाविलंबो नियतक्रमे आश्रीयमाणो भवति॥ अन्यथा हि किमेतदनंतरमेतत्क

र्त्तव्यमेतदनंतरं वेति प्रयोगविक्षेपापत्तेः॥ अतः प्रयोगविधिरेव स विधेयप्र

योगप्राशुभावसिध्यर्थं नियतंक्रममपि पदार्थविशेषणतया विधत्ते॥ अत एवां

गानां क्रमबोधको विधिः प्रयोगविधिरित्यपि लक्षणं॥ तत्र क्रमो नाम वितति

विशेषः पौर्वापर्य[illegible]रूपो वा तत्र षट् प्रमाणानि॥ श्रुत्यर्थपाठस्थानमुख्य

प्रवृत्त्याख्यानि॥ तत्र क्रमपरं वचनं श्रुतिः॥ तच्च द्विविधं॥ केवलं क्रमपरं तद्विशि

ष्टपदार्थपरं चेति॥ तत्र वेदं कृत्वा वेदिं करोतीति केवलक्रमपरं॥ वेदिकरणादेर्वे

8

चनांतरप्राप्तत्वात्॥वषट्कर्तुः प्रथमभक्ष [illegible] तितु क्रमविशिष्टपदार्थपरं एक
प्रसरतामंगमयेन भक्षानुवादेन क्रमभागस्य विधातुमशक्यत्वात्॥सेयं श्रुति
रितरप्रमाणापेक्षया बलवती॥तेषां वचनकल्पनद्वारा क्रमप्रमाणत्वात्॥अत
एवाश्विनग्रहस्य पाठक्रमात् तृतीयस्थाने ग्रहणप्रसक्तावाश्विनो दशमो [illegible] गृह्यत
इति वचनात्॥दशमस्थाने ग्रहणमित्युक्तं॥यत्र प्रयोजनवशेन क्रमनिर्णयः सः अ
र्थक्रमः यथा अग्निहोत्रं जुहोति यवागूं पचतीत्यग्निहोत्रयवागूपाकयोः॥अ
त्र [illegible] हि यवाग्वा होमार्थत्वेन तत्पाकः प्रयोजनवशेन पूर्वमनुष्ठीयते॥सचायं पाठक्र
मात् बलवान् यथापाठं त्वनुष्ठाने क्रमप्रयोजनबाधे ऽदृष्टार्थत्वं स्यात्॥नहि होमा
नंतरं क्रियमाणस्य पाकस्य किंचित् दृष्टं प्रयोजनमस्ति॥पदार्थबोधकवाक्यानां यः क्र
मः स पाठक्रमः॥तस्माच्च पदार्थानां क्रम आश्रीयते येन हि क्रमेण वाक्यानि पठितानि

११

तेनैवक्रमेणाधीतान्यर्थप्रत्ययं जनयन्ति॥ यत्वाप्रत्ययं च पदार्थानामनुष्ठाने॥ स च पाठो
द्विविधः मंत्रपाठो ब्राह्मणपाठश्चेति॥ तत्राग्नेयाग्नीषोमीययोः तत्तद्याज्यानुवाक्यात्वयः
क्रमः आम्नीयते स मंत्रपाठात्॥ स चायं मंत्रपाठो ब्राह्मणपाठात् बलीयान्॥ अनुष्ठा
ने ब्राह्मणवाक्यापेक्षया मंत्रपाठस्यांतरंगत्वात्॥ ब्राह्मणवाक्यं हि प्रयोगात् बहिरेवं
कर्त्तव्यमित्यवबोधयत्तार्थं॥ मंत्रा पुनः प्रयोगकाले व्याप्रियंते॥ अनुष्ठानक्र
मस्य स्मरणक्रमाधीनत्वात्॥ तत्क्रमस्य च मंत्रक्रमाधीनत्वात्॥ अंतरंगो मं
त्रपाठ इति॥ प्रयाजानां समिधो यजति तनूनपातं यजति इत्येवं क्रमात् यः क्रमः
स ब्राह्मणपाठक्रमात्॥ यद्यपि ब्राह्मणवाक्यान्यर्थं विधायकत्वाद्विनितत्वापि
प्रयाजादीनां क्रमस्मारकांतरस्याभावात् तान्येव क्रमस्मारकत्वेनस्वीक्रियंते॥ स्था
नेनामोपस्थितिः॥ यस्य हि देशेऽनुष्ठीयते तत्पूर्वोक्तनेपदार्थेकृते स एव प्रथममुप

स्थितो भवतीत्युक्तं तस्य प्रथममनुष्ठानं ॥ अत एव साद्यस्के अग्नीषोमीयसव
नीयानुबंध्यानां सवनीयदेशे सहानुष्ठाने कर्तव्ये आदौ सवनीयपशोरनुष्ठान
मितरयोः पश्चात् तस्मिन्देशे आश्विनग्रहणानंतरं सवनीयस्यैव प्रथममुपस्थि
तेः ॥ तथा हि ज्योतिष्टोमे त्रयः पशुयागाः अग्नीषोमीयः सवनीयः अनुबंध्यश्चेति
ते च भिन्नदे[illegible]शाः अग्नीषोमीय औपवसथ्ये ह्नि सवनीयः सुत्याकाले अनुबं
ध्यस्त्वंते साद्यस्को नाम यागविशेषः ॥ स चाव्यक्तत्वात् ज्योतिष्टोमविकारः अतः
तेन ये पि पशुयागाः साद्यस्के चोदकप्राप्ताः ते च तत्र सहैव क्रियंते सह पशू
नालंभत इति ॥ तत्र साहित्यं सवनीयदेशे तस्य प्रधानप्रत्यासत्तेः स्थानातिक्रमण
साम्याच्च ॥ सवनीयदेशे ह्यनुष्ठाने ऽग्नीषोमीयानुबंध्ययोः स्वस्वस्थानातिक्रमो भव
ति अग्नीषोमीयदेशे ऽनुबंध्यदेशे वा ऽनुष्ठाने त्रयाणामपि स्वस्वस्थानातिक्र[illegible]ः त
मः

९

व्यवधानं स्रुक्रमेणाग्निधारणे त्वाग्नेयप्रहविरग्निधारणआग्नेययागयोरत्यंतमव्यव
धानेरे द्दद ध्नाग्निधारणैंद्रयागयोः द्वंतरितं व्यवधानं तत्त्वायुक्रमित्युक्रमेव स
च मुख्यक्रमः पाठक्रमात्तु दुर्वलः मुख्यक्रमो हि प्रमाणांतरसापेक्षः प्रधान
क्रमप्रतिपत्तिकसापेक्षित्तयाविलंवितप्रतिपत्तिकः ॥ पाठक्रमस्तु निरपेक्षस्वा
ध्यायपाठक्रममात्रसापेक्षत्तया न तद्येति वलवान् ॥ प्रवृत्तिक्रमात्त्व वलवान्
प्रवृत्तिक्रमे हि वहूनामंगानां प्रधानविप्रकर्षात् मुख्यक्रमेतु सन्निकर्षात् स
ह प्रयुज्यमानेषु प्रधानेषु सन्निपातिनां अंगानां मावृत्त्याऽनुष्ठाने कर्त्तव्ये हि
10 द्वितीयादिपदार्थानां प्रथममनुष्ठितपदार्थक्रमात् यः क्रमः स प्रवृत्तिक्रमः ॥ य
था प्राजापत्यपश्वंगेषु प्राजापत्या हि वैश्वदेवीं कृत्वा प्राजापत्यैश्चरंतीति वाक्येन

१२

तृतीयानिर्देशात्सेतिकर्तव्यताका एककालत्वेन विहिता। अतस्तेषां तदङ्गा
नां चोपकरणनियोजनप्रभृतीनां साहित्यं संपाद्यं। तच्च प्राजापत्यपशूनां स
प्रतिपन्नदेवताकत्वेन युगपदनुष्ठानादुपपद्यते। तदङ्गानां चोपकरणादीनां
युगपदनुष्ठानमशक्यं। अतस्तेषां साहित्यमव्यवहितानुष्ठानात्संपाद्यं। तच्चै
कस्योपाकरणं विधाय परस्योपाकरणेन विधेयं। एवं नियोजनादिकमपि। तच्च
च प्रापयत्येषु कस्माच्चित्सज्ञारारभ्य एकं सर्वं सर्वत्रानुष्ठाय द्वितीयादिः पदार्थः। तेनै
व क्रमेणानुष्ठेयः स प्रवृत्तिक्रमः। सोऽयं पश्वादिष्वोदुवलिः। तदेवं संक्षेपतो षा
ड्विधक्रमनिरूपणेन प्रयोगविधिः। कर्मजन्यफलस्वाम्यबोधको विधिरधि
कारविधिः। कर्मजन्यफलस्वाम्यं कर्मजन्यफलभोक्तृत्वं। स च यजेत स्वर्ग

काम इत्यादिरूपः स्वर्गमुद्दिश्य यागं विदधताऽनेन स्वर्गकामस्य यागजन्यफ
लभोक्तृत्वं प्रतिपाद्यते॥ यस्याहिताग्नेरग्निर्गृहान् दहेत् सोऽग्नये क्षामवतेऽष्टाक
पालं निर्वपेदित्यादिनाऽग्निदाहादौ निमित्ते कर्म विदधता निमित्तवतः कर्म-
जन्यपापक्षयरूपफलस्वाम्यं प्रतिपाद्यते॥ एवमहरहः संध्यामुपासीतेत्या
दिना शुचिविहितकालजीविनः संध्योपासनजन्यप्रत्यवायपरिहाररूपफल
स्वाम्यं बोध्यते॥ तच्च फलस्वाम्यं तस्यैव योऽधिकारविशिष्टः॥ अधिकारत्वं च यद्वि
धिवाक्येषु पुरुषविशेषणत्वेन श्रूयते यथा काम्ये कर्म[illegible]णि फलकामना नैमित्ति
के कर्मणि निमित्तनिश्चयः नित्ये संध्योपासनादौ शुचि[illegible]तकालजीवित्वं
अत एव राजा राज[illegible]सूयेन स्वाराज्यकामो [illegible]यजेतेत्यनेन विधिवाक्येन स्वा
राज्यमुद्दिश्य विदधताऽपि न स्वाराज्यमात्रकामस्य तत्फलभोक्तृत्वं प्रतिपाद्यते

१४

किंतु राज्ञः स्वतः स्वाराज्यकामस्यैव राजत्वस्याधिअधिकारिविशेषणत्वे
नश्रवणात्तु क चित्तु पुरुषविशेषणत्वेनाप्यश्रुतमप्यधिकारिविशेषणं यच्चा
ध्ययनविधिसिद्धांक्रतुविधीनामर्थज्ञानापेक्ष[illegible]त्वेनाध्ययनविधिसि
द्धार्थज्ञानवंतं प्रत्येव प्रवृत्तेः॥ एवमग्निसाध्यकर्मसु आधानसिद्धाग्निमता
ग्निसाध्यकर्मणामग्न्यपेक्षत्वेन तद्विधीनामाधानसिद्धाग्निमंतं प्रत्येव प्रवृ
त्तेः॥ एवं सामर्थ्यमपि आख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणीति न्याया
त्समर्थं प्रत्येव विधिप्रवृत्तेः॥ तदेवं निरूपितो विधिः॥ प्रयोगसमवेतार्थस्मा
रका मंत्राः तेषां चातादृशार्थस्मारकत्वेनैवार्थवत्त्वं॥ नतु तदुच्चारणमदृष्टार्थं॥
संभवति दृष्टफलकत्वे [illegible] अदृष्टकल्पनाया अन्याय्यत्वात्॥ नच दृष्टस्या

विद्या न

र्थस्मरणस्य प्रकारांतरेणापि संभवान्मंत्राम्नानं व्यर्थमिति वाच्यं॥ मंत्रैरेव स्म
र्तव्यमिति नियमस्य विध्याश्रवणात्॥ नानासाधनसाध्यक्रियायामेकसाधनप्रा
प्तावप्राप्तस्यापरसाधनस्य प्रापको विधिर्नियमविधिः॥ यथाहुः॥ विधिरत्यं
तमप्राप्तौ नियमः पाक्षिके सति॥ तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते॥ इति॥
अस्यार्थः प्रमाणांतरेणाप्राप्तस्य प्रापको विधिरपूर्वविधिः॥ यथा यजेत स्व
र्गकाम इत्यादिः॥ स्वर्गार्थकयागस्य प्रमाणांतरेणाप्राप्तस्यानेन विधानात्॥ पक्षे
अप्राप्तस्य प्रापको विधिर्नियमविधिः॥ यथा व्रीहीनवहंतीत्यादिः॥ कथमस्य
पक्षेऽप्राप्तप्रापकत्वमिति चेत्तदित्थं॥ अनेन हि अवघातस्य वैतुष्यार्थत्वं न
प्रतिपाद्यतेऽन्वयव्यतिरेकसिद्धत्वात्॥ किंतु नियमः स चाप्राप्तांशपूरणं वैतुष्य

12

७५

स्य हि नानोपायसाध्यत्वाद्यदावघातं परित्यज्योपायांतरं ग्रहीतुमारभते तदा
वघातस्याप्राप्तत्वेन तद्विधानात्मकमप्राप्तांशपूरणमेवानेन विधिना क्रियते॥ अतः
अयं नियमविधौ अप्राप्तांशपूरण[illegible]त्मको नियम एव वाक्यार्थः॥ पक्षेऽप्राप्ताव
घातस्य विधानमिति यावत्॥ उभयोश्च युगपत्प्राप्तावितरव्यावृत्तिपरो विधिः परिसंख्या
[illegible]विधिः॥ यथा पंच पंचनखा भक्ष्या इति इदं हि वाक्यं न पंचनखभक्षणपरं
तस्य रागतः प्राप्तत्वात्॥ नापि नियमपरं पंचनखापंचनखभक्षणस्य युगप
[illegible]प्राप्तेः॥ पक्षेऽप्राप्त्यभावात्॥ अतः इदमपंचनखभक्षणनिवृत्तिप
रमिति भवति परिसंख्याविधिः॥ सा च द्विविधा श्रौती लाक्षणिकी चेति॥ तत्रात्र ह्येवा
वपंतीति श्रौती परिसंख्या एवकारेणापवमानातिरिक्तस्तोत्रव्यावृत्तेरभिधानात्॥ पंच
पंचनखा भक्ष्या इति तु लाक्षणिकी इतरनिवृत्तिवाचकपदाभावात्॥ अत एव त्रिदो

पगस्त्वा॥ दोषत्रयं च श्रुतहा[illegible]निरश्रुतकल्पनाप्राप्तबाधश्चेति॥ श्रुतस्य पंचम
स्वलक्षणस्य हानात्॥ अश्रुतार्थं च नरत्वलक्षणानिवृत्तेः कल्पनात् प्राप्तस्य चा
पंचनरत्वलक्षणस्य बाधनादिति॥ अस्मिंश्च दोषत्रये दोषद्वयं शाब्दनिष्ठं॥ प्रा
प्तबाधस्त्वर्थनिष्ठ[illegible]इति दिक्॥ येषां तु प्रयोगसमवेतार्थस्मारकत्वं संभव
तीति तु द्वारणस्यानन्यगत्याऽदृष्टार्थकत्वं[illegible]कल्प्यत इति नानर्थक्यमिति॥
नामधेयानां च विधेयार्थ[illegible]परिच्छेदकतयार्थवत्त्वं॥ तथा हि उद्भिदा य

जेत पशुकाम इत्यत्र उद्भिच्छब्दो यागनामधेयं तेन च विधेयार्थपरिच्छेदः
क्रियते॥ तथा हि अनेन वाक्येनाप्राप्तत्वात् फलोद्देशेन यागो विधीयते यागसामान्यस्याविधेयत्वात् यागविशेष एवाभिधीयते॥ तत्र कोऽसौ याग

विशेषइत्यपेक्षायामुद्भिच्छब्दादुद्भिद्रूपोयागइतिविज्ञायते॥उद्भिदायागे
नपशुंभावयेदित्यत्रसामानाधिकरण्येननामधेयान्वयात्॥नामधेयत्वंच
निमित्तचतुष्टयात्मत्वर्थलक्षणाभयाद्वाक्यभेदभयात्तत्प्रख्यशास्त्रात्त
द्व्यपदेशादिति॥तत्रोद्भिदायजेतपशुकामइत्यत्रोद्भिच्छब्दस्ययागनामधेयत्वं
मत्वर्थलक्षणाभयात्॥नहितावदनेनवाक्येनफलंप्रतियागविधानं॥
तंप्रतिचगुणविधानंयुज्यतेवाक्यभेदापत्तेः॥उद्भिच्छब्दस्यगुणसमर्पकत्वेच
यागस्याप्राप्तत्वात्गुणविशिष्टकर्मविधानंवाच्यं॥उद्भिद्वतायागेनपशुं
भावयेदितिविशिष्टविधौमत्वर्थलक्षणेत्युक्तमेव॥चित्रयायजेतपशुकाम
इत्यत्रचित्राशब्दस्यकर्मनामधेयत्वंवाक्यभेदभयात्॥नहितावदत्रगुणवि
शिष्टयागविधानंसंभवति॥दधिमधुपयोघृतंधानाउदकंतंडुलाःतत्संसृ

प्रवर्त्तनां प्रतिपादयन् स्वप्रवर्त्तकनिर्वाहार्थं विधेयस्य यागादेरिष्टसाधनत्वमा
क्षिपन् पुरुषं तत्र प्रवर्त्तयति॥ तथा नञ् कलंजं न भक्षयेदित्यादिनिषेधोऽपि निव
र्त्तनां प्रतिपादयन् स्वनिवर्त्तकत्वनिर्वाहार्थं निषेध्यस्य कलंजभक्षणस्य परा
निष्टसाधनत्वमाक्षिपन् पुरुषं ततो निवर्त्तयति॥ ननु निषेधवाक्यस्य कथं नि
वर्त्तनाप्रतिपादकत्वमिति चेत् उच्यते॥ न तावदत्र धात्वर्थस्य नञर्थेनान्वयः॥
अव्यवधानेऽपि तस्य प्रत्ययार्थभावनोपसर्जनत्वेनोपस्थितेः॥ तस्य चोपसर्जन
त्वेनोपस्थितत्वमन्यत्रान्वेति॥ अन्यथा राजपुरुषमानयेत्यादावपि राज्ञः क्रियान्व
यापत्तेः॥ अतः प्रत्ययार्थस्यैव नञर्थेनान्वयः तत्रापि नाख्यात[illegible]त्वांशवाच्या
र्थभावनायाः तस्याः लिङंशवाच्यप्रवर्त्तनोपसर्जनत्वेनोपस्थितेः॥ किंतु
लिङंशवाच्यशाब्दभावनायाः तस्याः सर्वापेक्षया प्रधानत्वात् नञर्थेपरस्य

14

भावो यत्स्वसमभिव्याहृतपदार्थविरोधिबोधकत्वं॥ यथा घटो नास्ती॥
त्यादौ अस्तीतिशब्दसमभिव्याहृतो नञ् घटसत्त्वविरोधिघटासत्त्वं
१९ गमयति॥ तदिह लिङ्समभिव्याहृतो नञ् लिङर्थप्रवर्त्तनाविरोधि
नीं निवर्त्तनामेव बोधयति॥ तदिह विधिवाक्यश्रवणे अयं मां प्रवर्त्तयती
ति प्रतीतेः तस्मान्निषेधवाक्यस्थले निवर्त्तनैव वाक्यार्थः॥ यदा तु प्रत्ययार्थ
स्य तत्रान्वये बाधकं तदा धात्वर्थस्यैव तत्रान्वयः॥ तच्च बाधकं द्विविधं॥ तस्य
व्रतमित्युपक्रमो विकल्पप्रसक्तिश्च॥ तत्राद्यं नेक्षेतोद्यन्तमादित्यमित्यादौ
तस्य व्रतमित्युपक्रमेण तद्वाक्यपाठात्॥ तथा चात्र पर्युदासाश्रयणं॥ तथा हि
व्रतशब्दस्य कर्त्तव्यार्थे रूढत्वात् तस्य व्रतमित्यत्र स्नातकस्य व्रतानां कर्त्तव्यत्वे

नोपक्रमात्॥ किंतत्कर्तव्यमित्याकांक्षायां नेक्षेतोद्यंतमादित्यमित्यादि
नाकर्तव्यत्वमेव प्रतिपादनीयः अन्यथा पूर्ववाक्ययोरेकवाक्यत्वं न स्या
त्॥ तथा च नञर्थेन प्रत्ययार्थान्वयः कर्तव्यत्वानवबोधात् विध्यर्थप्रव
र्तनाविरोधिनिवर्तनापाएव तात्पर्य [illegible] नात्॥ तस्याश्च कर्त
व्यार्थत्वाभावात्॥ तस्मान्नेक्षेतेत्यत्र नञर्थ्याख्यार्थविरोधीक्षणसं
कल्पएव लक्षणया प्रतिपाद्यते तस्य कर्तव्यत्वसंभवात् आदित्यविषयका य
नीक्षणसंकल्पेन भावयेदिति वाक्यार्थः॥ तत्र भाव्याकांक्षायां एतावता
हैनसा वियुक्तो भवतीति वाक्यशेषावगतः पापक्षयो भाव्यतया चेति॥ ए
वं च पूर्वोत्तरयोरेकवाक्यत्वं निर्वहत्येव॥ न चात्र धात्वर्थविरोधिनः पदा

स्वार्थ
सत्य
16

वनानुयाजेष्विष्यनेन यजतिषु येयजामहं करोतीत्यस्य बाधः स्यादिति वाच्यं॥ परस्परनिरपेक्षयोरेव शास्त्रयोर्बाध्यबाधकभावात्॥ पदशास्त्रस्य हि शास्त्रविधानार्थमाहवनीयशास्त्रानपेक्षणान्निरपेक्षत्वं॥ प्रकृते तु निषेधशास्त्रस्य निषेध्यप्रवृत्त्यर्थं यजतिषु येयजामहं इत्यस्यापेक्षणान्न निरपेक्षत्वं॥ तस्मात् शास्त्रविहितस्य शास्त्रान्तरेण प्रतिषेधे विकल्प एव॥ स च न युक्तः विकल्पे शास्त्रस्य पाक्षिकाप्रामाण्यसंपातात्॥ न स्यनुयाजेषु येयजामह मित्यस्यानुष्ठानेनानुयाजेष्विष्यस्य प्रामाण्यं संभवति॥ व्रीहियागानुष्ठाने यवशास्त्रस्येव दूरदृष्टकल्पनाच्च स्यात्॥ विधिप्रतिषेधयोरपि पुरुषार्थत्वात्॥ अतो न प्रतिषेधस्याश्रयणं॥ किं तु ओं संबंधमाश्रित्य पर्युदासस्यैव इत्यं चानुयाजव्यतिरिक्तेषु यजतिषु येयजामह मिति मंत्रं कुर्यादिति वाक्यार्थबोधः॥ नञोऽनुयाजव्यति

नञोऽनुयाज

२७

रिक्तेला क्षणिकत्वात्॥ एवं च त्रविकल्पाः॥ अत्र च वाक्ये ये यजामह इति
न विद्यते॥ यजति षु ये यजामह इत्यनेव प्राप्तत्वात्॥ किंतु सामान्य शास्त्र
प्रा[illegible]प्त ये ये यजामह इत्यनुवादेन तस्यानुयाजव्यतिरिक्त विषयं सामान्य
मात्र प्राप्तस्य विशेषे संकोचनरूपादुपसंहारात् पर्युदासस्य भेदो नस्या
दिति चेन्न॥ उपसंहारो [illegible] हि + कर्तव्ये विधीयते यत्र जे यति षु ये [illegible] यजाम
हं करोतीति तत्र अनुयाज व्यतिरिक्तेष्वेवेति॥ न चैवं + तन्मात्र संकोचार्थः॥
यथा पुरोडाशं चतुर्धा करोतीति सामान्य प्राप्तं चतुर्धा करणं॥ आग्ने
यं चतुर्धा करोतीति॥ विशेषाद् आग्नेय पुरोडाश मात्रे संकोच्यते पर्युदास
स्तु तदन्यमात्र संकोचार्थ इतितत्तो भेदात्॥ कुत्रचित् विकल्प प्रसक्ता
व[illegible]प्यनन्यगत्या प्रतिषेधाश्रयणं॥ यथा नातिरात्रे षोडशिनं गृह्णातीति

स्यादौ अत्र हि अतिरात्रे षोडशिनं गृह्णातीति शास्त्रप्राप्तषोडशिग्रहणस्य नि
षेधाद्विकल्पप्रसक्तावपि न पू[illegible]र्युदासाश्रयणं ॥ असंभवात् ॥ तथाहि ॥ यद्य
त्रषोडशिपदार्थे नञर्थान्वयस्तदातिरात्रे षोडशिव्यतिरिक्तं गृह्णातीति वा
क्यार्थबोधः स्यात् ॥ स च न संभवति ॥ अतिरात्रे षोडशिनं गृह्णातीति प्रत्यक्ष
विधिविरोधात् ॥ यदि चातिरात्रपदार्थे नञर्थान्वयः तदातिरात्रव्यतिरिक्ते षो
डशिनं गृह्णातीति वाक्यार्थबोधः स्यात् सोपि न संभवति तद्विधिविरोधात् ॥
अतोत्रानुगस्याशास्त्रप्राप्तषोडशिग्रहणस्यैव निषेधः ॥ न च विकल्पप्रस
क्तिः तस्याप्यपेक्षणीयत्वात् ॥ इयांस्तु विशेषो यद्विकल्पादेकप्रतिषेध्येपि
प्रतिषिध्यमानस्यानर्थहेतुत्वं ॥ विधिनिषेधोभयस्यापि क्रत्वर्थत्वात् ॥ यत्र तु
न विकल्पः ॥ प्राप्तिश्च रागत एव प्रतिषेधश्च पुरुषार्थः ॥ तत्र निषिध्यमानस्य